# ३०. तं जानन्ति वा भवन्तः

जानाति जानन्ति
जानामि जानीमः

कार्यकर्ता - हरिः ओम्, सुप्रभातम् ।

गृहस्थः - हरिः ओम् उपविशतु, कः विशेषः ? वदतु ।

कार्यकर्ता - वेङ्कटेशकुमारः इति कश्चन सङ्गणकतन्त्रज्ञः अस्ति । तस्य गृहम् भवति । तस्य गृहसंख्या अत्र अस्ति । तं जानन्ति वा भवन्तः ।

गृहस्थः - वेङ्कटेशः इति नाम श्रुतवान् । तस्य गृहसंख्यां वदतु ।

कार्यकर्ता - अहं वेङ्कटेशं जानामि । तस्य गृहसंख्या १३०५ अस्ति । तस्य गृहम् इतः बहु समीपे अस्ति ।

गृहस्थः - वीणे ! त्वं वेङ्कटेशं जानासि ? पश्यतु एतां संख्याम् ।

वीणा - वेङ्कटेशः, १३०५ हाँ .... भोः भवान् अपि एतं जानाति । तस्य गृहम् एतस्य पृष्ठभागे अस्ति । अस्माकं कार्यालये सर्वेऽपि तं जानन्ति ।

कार्यकर्ता - सः उक्तवान् यत् अत्र पृच्छतु । सर्वे मां जानन्ति, इति सोऽपि समीचीन कार्यकर्ता ।

गृहस्थः - इदानीं स्मृतवान् । तं वयं 'कुमार' इति आह्वयामः । अतः वेङ्कटेशः इत्युक्ते न स्मृतवान् । भवतु पानीयं किमपि स्वीकरोतु ।

कार्यकर्ता - तर्हि किञ्चित् क्षीरं ददातु । वेङ्कटेशस्य गृहे एव अद्य उपाहारः ।

वीणा - वयमपि तस्य गृहं गृहसदस्यान् च सम्यक् जानीमः । तदा तदा गच्छामः ।

कार्यकर्ता - अस्तु, धन्यवादः, गच्छामि । तत्र सर्वे मम प्रतीक्षां कुर्वन्ति ।